শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে দ্বিচৎৱারিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে দ্বিচৎৱারিংশং দশকম্ ॥

## শকটাসুরৱধৱর্ণনম্

কদাপি জন্মর্ক্ষদিনে তৱ প্রভো
 নিমন্ত্রিতজ্ঞাতিৱধূমহীসুরা।
মহানসস্ত্বাং সৱিধে নিধায সা
 মহানসাদৌ ৱৱৃতে ৱ্রজেশ্ৱরী ॥ **42.1** ॥

ততো ভৱত্ত্রাণনিযুক্তবালক -
 প্রভীতিসঙ্ক্রন্দনসঙ্কুলারৱৈঃ।
ৱিমিশ্রমশ্রাৱি ভৱৎসমীপতঃ
 পরিস্ফুটদ্দারুচটচ্চটারৱঃ ॥ **42.2** ॥

ততস্তদাকর্ণনসম্ভ্রমশ্রম -
 প্রকম্পিৱক্ষোজভরা ৱ্রজাঙ্গনাঃ।
ভৱন্তমন্তর্দদৃশুস্সমন্ততো
 ৱিনিষ্পতদ্দারুণদারুমধ্যগম্ ॥ **42.3** ॥

শিশোরহো কিং কিমভূদিতি দ্রুতং
 প্রধাৱ্য নন্দঃ পশুপাশ্চ ভূসুরাঃ।
ভৱন্তমালোক্য যশোদযা ধৃতং
 সমাশ্ৱসন্নশ্রুজলার্দ্রলোচনাঃ ॥ **42.4** ॥

কস্কো নু কৌতস্কুত এষ ৱিস্মযো
 ৱিশঙ্কটং যচ্ছকটং ৱিপাটিতম্।

ন কারণং কিঞ্চিদিহেতি তে স্থিতাঃ
    স্বনাসিকাদত্তকরাস্ত্বদীক্ষকাঃ ॥ **42.5** ॥

কুমারকস্যাস্য পযোধরার্থিনঃ
    প্ররোদনে লোলপদাম্বুজাহতম্।
মযা মযা দৃষ্টমনো ৱিপর্যগা -
    দিতীশ তে পালকবালকা জগুঃ ॥ **42.6** ॥

ভিযা তদা কিঞ্চিদজানতামিদং
    কুমারকাণামতিদুর্ঘটং ৱচঃ।
ভৱৎপ্রভাৱাৱিদুরৈরিতীরিতং
    মনাগিৱাশঙ্ক্যত দৃষ্টপূতনৈঃ ॥ **42.7** ॥

প্রৱালতাম্রং কিমিদং পদং ক্ষতং
    সরোজরম্যৌ নু করৌ ৱিরোজিতৌ।
ইতি প্রসর্পৎকরুণাতরঙ্গিতা -
    স্ত্বদঙ্গমাপস্পৃশুরঙ্গনাজনাঃ ॥ **42.8** ॥

অযে সুতং দেহি জগৎপতেঃ কৃপা -
    তরঙ্গপাতাৎপরিপাতমদ্য মে।
ইতি স্ম সঙ্গৃহ্য পিতা ৎৱদঙ্গকং
    মুহুর্মুহুঃ শ্লিষ্যতি জাতকণ্টকঃ ॥ **42.9** ॥

অনোনিলীনঃ কিল হন্তুমাগতঃ
    সুরারিরেৱং ভৱতা ৱিহিংসিতঃ।
রজোঽপি নো দৃষ্টমমুষ্য তৎকথং
    স শুদ্ধসত্ত্বে ৎৱযি লীনৱান্ ধ্রুৱম্ ॥ **42.10** ॥

প্রপূজিতৈস্তত্র ততো দ্বিজাতিভি -
    র্ৱিশেষতো লম্ভিতমঙ্গলাশিষঃ।

ব্রজং নিজৈর্বাল্যরসৈর্ৱিমোহযন্
    মরুৎপুরাধীশ রুজাং জহীহি মে॥ **42.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে দ্বিচৎৱারিংশং দশকং সমাপ্তম্ ॥